ह्रीं गौरि रुद्रदयिते योगेश्वरि सर्व्वम्फट् ।
द्विठान्त: षोड़शार्णोऽयं मन्त्र: सद्भिरुदीरित: ।”

इति घटार्गलयन्त्रम् ॥*॥

“तारे हुं विलिखेत् वरोन्नकुहरे साध्याभिधानान्वितं
मन्त्रार्णान् वसुसंख्यकान् वसुदलेष्वालिख्य तद्बाह्यत: ।
शक्त्या त्रि: परिवेष्टितं घटगतं पद्मस्थमन्त्राननं
यन्त्रं वश्यकरं ग्रहादिभयहृल्लक्ष्मीप्रदं कीर्त्तिदम् ।”

इति त्वरितायन्त्रम् ॥ * ॥

“पद्मं भानुदलान्वितं प्रविलिखेत् तत्कर्णिकायां पुनस्तारं शक्तिगबीजसाध्यसहितं तत्केशरेषु क्रमात् ।
मर्दिन्यामनुसम्भवान् युगलशो वर्णान् पुन: पत्रगान्
मन्त्रार्णान् गुणशो विधाय विलिखेदन्त्यं तदन्ते दले ।”

मन्त्रस्तु । [स्थितम् ।
“उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुप-
यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा ॥
मातृकार्णेन संवीतं भूपुरद्वयमध्यगम् ।
यन्त्रञ्च विन्ध्यवासिन्या: प्रोक्तं सर्व्वसमृद्धिदम् ॥
रक्षाकरं विशेषेण क्षुद्रभूतादिनाशनम् ।
राज्यदं भ्रष्टराज्यानां वश्यदं वश्यमिच्छताम् ॥
सुतार्थिनीनां सुतदं रोगिणां रोगशान्तिदम् ।
बहुना किमिहोक्तेन यन्त्रं यत् कामदो मणि: ।”

इति वनदुर्गायन्त्रम् ॥*॥

अथ लक्ष्मीयन्त्रम् ।
“वेदादिस्थितसाध्यनामयुगश: श्रीशक्तिमारान्वितं
किञ्जल्केषु दिनेशपत्रविलसन्मन्त्राक्षरं तद्बहि: ।
पद्मं व्यञ्जनकेशरं स्वरलसत्पत्राष्टयुग्मं धराबिम्बाभ्यां वषडन्तया त्वरितया यन्त्रं लिखेद्वेष्टितम् ।
भूपुरद्वयकोणेषु श्रियौ लेख्यौ पुन: पुन: ।
महालक्ष्मीयन्त्रमिदं सर्व्वैश्वर्य्यफलप्रदम् ॥
सर्व्वदु:खप्रशमनं सर्व्वापद्विनिवारकम् ।
बहुना किमिहोक्तेन परमस्मान्न विद्यते ॥”*॥

अथ त्रिपुरभैरवीयन्त्रम् । [स्त्रिशो
“मध्याद्यं नवयोनिषु प्रविलिखेद्बीजानि वर्णां-
गायत्र्या: पुनरष्टपत्रविवरेष्वालिख्य लिप्यावृतम् ।
भूबिम्बद्वितयेन मन्मथयुजा कोणेषु संवेष्टितं
यन्त्रं त्रैपुरमीरितं त्रिभुवनप्रक्षोभणं श्रीप्रदम् ।”

गायत्री तु ।
“मन्मथं त्रिपुरादेवि विद्महे पदमुद्धरेत् ।
उक्त्वा कामेश्वरिपदं प्रवदेदथ धीमहि ॥
अन्ते च प्रवदेद्भूयस्तन्न: क्लिन्ने प्रचोदयात् ।
गायत्र्येषा समाख्याता त्रैपुरी सर्व्वसिद्धिदा ।”

यन्त्रान्तरम् ।
“वह्नेर्गेहयुगान्तरस्थमदने मायां लिखेद्वाग्भवं
षट्कोणेष्वथ सन्धिषु प्रविलिखेत् हुंकारमावेष्टितम् ।
क्लींबीजेन समीरितं त्रिभुवनप्रक्षोभणं त्रैपुरं
यन्त्रं पञ्चमनोभवात्मकमिदं सौन्दर्य्यसम्पत्करम् ।”

इति त्रिपुरायन्त्रम् ॥*॥

अथ श्रीविद्यायन्त्रम् ।
“विशेषं धारणं यन्त्रं प्रसङ्गात् कथयामि ते ॥
रेफहकारयोर्मध्ये देवीनामभिसुख्यकम् ।
साध्यनाम द्वितीयान्तं तस्योर्द्धे विलिखेन्मनुम् ॥
तत्रैव मातृका सर्व्वा विलिखेच्चक्रबाह्यत: ।
पञ्चगव्यान्वितेनैव सूत्रेण परिवेष्टयेत् ॥
तत्र प्राणं प्रतिष्ठाप्य विद्यामष्टोत्तरं शतम् ।
तत् स्पृष्ट्वा प्रजपेन्मन्त्री देवीध्यानपरायण: ॥
हेम्नो मध्यगतं कृत्वा रजतस्याथवा पुन: ।
करे धृत्वा जगद्वश्यं हृदये स्त्रीषु वल्लभम् ॥
कण्ठे धनं लभेद्बाहौ स्तम्भनं जृम्भनं भवेत् ।
शिखायां मोक्षमाप्नोति तस्माद्यत्नेन धारयेत् ।”*॥

अथ गणेशयन्त्रम् ।
“बीजं षट्कोणमध्ये स्फुरदनलपुरे तारगं दिक्षु लक्ष्मीमायाकन्दर्पभूमीस्तदनुरसपुटेष्वालिखेद्बीजषट्कम् ।
तत्सन्धिष्वङ्गमन्त्रान् वसुदलकमले मूलमन्त्रस्य वर्णान्
शिष्टान् पत्रेषु विद्वान् विलिखतु गुणशश्चान्त्यमन्त्ये पलाशे ।
व्यावीतं लिपिभि: क्रमोत्क्रमवशात् पाशाङ्कुशाभ्यामपि
भूबिम्बद्वितयेन वेष्टितमिदं यन्त्रं गणाधीशितु: ।
लाक्षाकुङ्कुमरोचनामृगमदैर्भूर्ज्जोदरे हेम्नि वा
संलिख्याभिवहन् लभेत सकलै: संप्रार्थनीयां श्रियम् ॥
उक्तं महागणपतेर्व्विधानं सुरपूजितम् ।
सर्व्वसिद्धिकरं पुंसां समस्तपुरुषार्थदम् ।”*॥

अथ श्रीरामयन्त्रम् ।
“तारं मध्ये विलिखतु मनुं षट्सु कोणेषु सन्धिष्वङ्गं मायां स्मरमपि लिखेत् कोणगण्डेषु पश्चात् ।
किञ्जल्केषु स्वरगणमतो पत्रमध्येषु मालामन्त्रस्यार्णान् गुहसुखमितानष्टमे पञ्चवर्णान् ।
दशाक्षरेण संवेष्ट्य कादिवर्णैश्च भूपुरे ।
दिग्विदिक्षु लिखेद्बीजे नरसिंहवराहयो: ॥
नमो भगवते ब्रूयाच्चतुर्थ्या रघुनन्दनम् ।
रक्षोघ्नविषदायान्ते मधुरादि समीरयेत् ॥
प्रसन्नवदनायेति पश्चादमिततेजसे ।
बलाय पश्चाद्रामाय विष्णवे तदनन्तरम् ।
प्रणवादिनमोऽन्तोऽयं मालामन्त्र: प्रकीर्त्तित: ॥”

अथ नृसिंहयन्त्रम् ।
“बीजं साध्यसमन्वितं प्रविलिखेन्मध्येऽष्टपत्रेष्वथो
मन्त्रार्णान् श्रुतिशो विभज्य विलिखेल्लिप्या बहिर्व्वेष्टयेत् ।
बाह्ये कोणगबीजवह्निवसुधागेहद्वयेनावृतं
यन्त्रं क्षुद्रविषग्रहामयरिपुप्रध्वंसनं श्रीप्रदम् ।”*॥

अथ गोपालयन्त्रम् । [षड़र्णं
“पिण्डं मूलेन वीतं दहनपुरयुगे कोणराजत्कुर्य्यात् पद्मं दशार्णस्फुरितदशदलं कामबीजेन वीतम् ।
पद्मं किञ्जल्कसंस्थस्वरविलसितदलप्रोल्लसत्षोड़शार्णं
किञ्जल्कयज्ञगाष्ट्र विकृतियुगदलेष्वर्पितानष्टवर्णान् ॥
पाशाङ्कुशाभ्यामावीतं क्षोणीपुरयुगास्त्रिषु ।
अष्टाक्षरेण लक्षितं यन्त्रं गोपालदैवतम् ॥
धर्म्मार्थकामफलदं सर्व्वरक्षाकरं स्मृतम् ।
पञ्चान्तको धरासंस्थो मनुबिन्दुविभूषित: ॥
पिण्डबीजमिदं प्रोक्तं सर्व्वसिद्धिकरं परम् ।
स्मर: कृष्णाय ठद्वन्द्वं षड़र्णो मनुरीरित: ॥
गोपीजनान्ते प्रददेद्वल्लभायाग्निवल्लभा ।
अयं दशाक्षरो मन्त्रो दृष्टादृष्टफलप्रद: ॥
प्रणवं हृदयं कृष्णं ङेऽन्तमुक्त्वा तत: परम् ।
तादृशं देवकीपुत्रं हुंफट्स्वाहासमन्वितम् ।
षोड़शाक्षरमन्त्रोऽयं गोविन्दस्य जगत्पते: ॥
पिण्डं रतिपतेर्ब्बीजं नमो भगवते तत: ।
नन्दपुत्राय बालादिवपुषे श्यामलाय च ॥
गोपीजनपदस्यान्ते वल्लभाय द्विठावधि ।
अनुष्टुप् मन्त्र आख्यातो गोपालस्य जगत्पते: ॥
अनङ्ग: कृष्णगोविन्दौ ङेऽन्तावष्टाक्षरो मनु: ।”

इति गोपालयन्त्रम् ॥ * ॥

अथ गोपालस्य यन्त्रान्तरम् ।
“प्राक् प्रत्यक् दक्षिणोदक् विधिवदभिलिखेत् सप्तरेखाचतुष्कं
कोणोपच्छूलयुक्तं वलययुगयुतं मध्यपूर्व्वं तदन्तम् ।
श्लोकस्यार्णान् पुरस्ताद्वसुपदविवरेष्वष्टवर्णं लिखित्वा
तद्बाह्ये द्वादशार्णैस्तदनुपरिवृतं देवकीपुत्रयन्त्रम् ॥
तं सुकी देव देवेतं तं वेदे वरतो वतम् ।
तं वर्ता रूढ़तो ख्यातं तं ख्यातो देवकीसुतम् ॥
लिखितं भूर्ज्जपत्रादौ यन्त्रमेतद्यथाविधि ।
विधृतं बाहुना नित्यं सर्व्वकामफलप्रदम् ॥
पलाशवृक्षफलके लिखितं साधु साधितम् ।
गोस्थाने निखनेदेतत् गवां वृद्धिर्भवेत्तदा ।”*॥

अथ शिवयन्त्रम् । तत्रादौ षट्कोणमण्डलं कृत्वा तदन्त: साध्यनामयुक्तं प्रासादबीजं विलिख्य षट्कोणेषु प्रणवसहितपञ्चाक्षरवर्णान् विलिख्य विवरेषु षड़ङ्गमन्त्रान् तद्बहि: पञ्चदलानि विरचय्य तद्दलेषु ॐ ईशानाय नम: ॐ तत्पुरुषाय नम: ॐ अघोराय नम: